# ज्योतिषशास्त्रसम्मतप्रमाणानि

30.09.20
1

अन्यानि शास्त्राणि अप्रत्यक्षाणि सन्ति परन्तु ज्योतिष-शास्त्रमेव केवलं प्रत्यक्षशास्त्रमस्ति। शास्त्रेऽस्मिन् त्रीणि प्रमाणानि गृहीतानि सन्ति। कस्यचित् अपि शास्त्रस्य प्रामाण्यं प्रमाणबलेनैव क्रियते, अतोऽत्र ज्योतिषशास्त्रे कानि प्रमाणानि गृहीतानि सन्त्यत्र विविधविचारदृष्ट्या मीमांस्यते।

यथोपलभ्यते अन्येऽस्मिन् शास्त्रे प्रमाणं तेनैव प्रमाणेनात्र प्रमेयस्य चर्चा स्फुटीक्रियते। प्रसङ्गेऽस्मिन् सर्व-प्रथमम् अस्य प्रमाणस्य विवेचना ज्योतिषपरम्परायाः पाश्चा-त्य-ग्रन्थकारः कमलाकरभट्टमहोदयेन कृतमस्ति।

तत्रोक्तं — प्रत्यक्ष-आगम-युक्तिशालि तदिदं शास्त्रम्।

अर्थात् ज्योतिषशास्त्रे त्रीणि प्रमाणानि गृहीतानि सन्ति, तत्र प्रत्यक्ष-आगम-युक्तिनाम्नेति प्रसिद्धम्।

यद्यपि स्कन्धत्रयज्योतिषशास्त्रे केवलं सिद्धान्ते एव अस्य मतस्योपलब्धिः भवति, परन्तु स्कन्धत्रये प्रयुज्यते।

प्रमाणविषयम् अवलम्ब्य विविधविचारदृष्ट्या परि-चर्चा उपस्थाप्यते —

(1) प्रत्यक्षप्रमाणम् —

ज्योतिषस्यापरनाम प्रत्यक्षशास्त्रमपि अस्ति यतो हि अन्यानि सर्वाण्यपि शास्त्राणि अप्रत्यक्षाणि सन्ति तेषां प्रत्यक्षफलस्योपलब्धिः नोपलभ्यते। यदि ज्योतिष-शास्त्रे सूर्योदयः पञ्चवादने आयाति, परन्तु प्रत्यक्षदृष्टे, सत्यपि यदि पञ्चवादने सूर्योदयः परिलक्ष्यते तदैव तस्य गणनायां महत्त्वमङ्गीक्रियते अस्माभिः। एवं विशेषचमत्कृतिः ग्रहणावसरे एव उपलभ्यते इत्थमत्र वक्तुं शक्यते।

P.T.O

गणितीयविधिनागतस्य परिणामस्य प्रामाण्यं तदैव भवति, यदा सैव स्थितिः आकाशे तस्मिन् काले दृष्टिगोचरीभवेदिति । यथोक्तम् आचार्यभास्करेण —

...... खेटैः स्फुटैरेव फलस्फुटत्वम् ।
स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या ॥

एवमत्र प्रत्यक्षाभावे नहि ज्योतिषस्य प्रामाण्यम् इति, अत्रोक्तमस्ति यत् – यदि गणितीयविधिना आगतो ग्रहः प्रत्यक्षाकाशे नोपलभ्यते, तदा यदन्तरं तयोर्मध्ये समायाति, तदनुपातेन सततावेक्षणेन बीजसंस्कारो कर्तव्यः इति ।

प्रत्यक्षप्रमाणस्योपलब्धिः अनेकस्मिन् स्थाने भिन्न-भिन्नरूपेण भवति । यथा — ग्रहाणां स्पष्टीकरणविचारे परममन्दफल - परमशीघ्रफलसाधने प्रत्यक्षप्रमाणमेव कारणं भवति । तत्र परमफलं ज्ञानं विना अनुपातागतफलस्य प्राप्तिर्न सम्भवति । एवमेवोदाहरणं सौरसिद्धान्ते दृश्यते, तत्रोक्तमस्ति यत् – सम- विषमविभागेन मन्दशीघ्रपरिधयः पृथक्-पृथक् भवन्ति । अत्रोपपत्तौ केवलं प्रत्यक्षप्रमाणमेव कारणं विद्यते नान्यत् किमपि कारणमस्ति । आचार्य- आर्यभट्टादारभ्य कमलाकरभट्ट यावत् सर्वैरेकस्वरेण प्रत्यक्षप्रमाणस्यैव सर्वाधिकं ग्रहणं समर्थनं च कृतमिति ।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं०महावि० सुखसेना,
पूर्णियाँ ।